योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०१६

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

भूतलाप्सरसा सार्धमनन्यदयितापतिः ।

अकृत्रिमप्रेमरसं स रेमे कान्तया तया ।। १

उद्यानवनगुल्मेषु तमालगहनेषु च ।

पुष्पमण्डपरम्येषु लतावलयसद्मसु ।। २

पुष्पान्तःपुरशय्यासु पुष्पसंभारवीथिषु ।

वसन्तोद्यानदोलासु क्रीडापुष्करिणीषु च ।। ३

चन्दनद्रुमशैलेषु संतानकतलेषु च ।

कदम्बनीपगेहेषु पारिभद्रोदरेषु च ।। ४

विकसत्कुन्दमन्दारमकरन्दसुगन्धिषु ।

वसन्तवनजालेषु कूजत्कोकिलपक्षिषु ।। ५

नानारण्यतृणानां च स्थलेषु मृदुदीप्तिषु ।

निर्झरेषु तरत्तारसीकरासारवर्षिषु ।। ६

शैलानां मणिमाणिक्यशिलानां फलकेषु च ।

देवर्षिमुनिगेहेषु दूरपुण्याश्रमेषु च ।। ७

कुमुद्वतीषु फुल्लासु स्मेरासु नलिनीषु च ।

वनस्थलीषु कृष्णासु फुल्लासु फलिनीषु च ।।

सुरतैः सुरतारुण्यैः सुन्दरः सुन्दरेहितैः ।

ईहितैः पेशलान्योन्यघनप्रेमरसाधिकैः ।। ९

प्रहेलिकाभिराख्यानैस्तथा चाक्षरमुष्टिभिः ।

अष्टापदैर्बहुद्यूतैस्तथा गूढचतुर्थकैः ।। १०

नाटिकाख्यायिकाभिश्च श्लोकैर्विन्दुमतिक्रमैः ।

देशकालविभागैश्च नगरग्रामचेष्टितैः ।। ११

स्रग्दाममालावलितैर्नानाभरणयोजनैः ।

लीलाविलोलचलनैर्विचित्ररसभोजनैः ।। १२

आर्द्रकुङ्कुमकर्पूरताम्बूलीदलचर्वणैः ।

फुल्लपुष्पलतागुञ्जादेहगोपनखव्रणैः ।। १३

समालम्भनलीलाभिर्मालाप्रहरणक्रमैः ।

गृहे कुसुमदोलाभिरन्योन्यं दोलनक्रमैः ।। १४

नौयानयुग्महस्त्यश्वदान्तोष्ट्रादिगमागमैः ।

जलकेलिविलासेन परस्परसमुक्षणैः ।। १५

नृत्यगीतकलालास्यतालताण्डवमण्डनैः ।

संगीतकैः संकथनैर्वीणामुरजवादनैः ।। १६

उद्यानेषु सरित्तीरवृक्षेषु वरवीथिषु ।

अन्तःपुरेषु हर्म्येषु फुल्लदोलावदोलनैः ।। १७

सा तथा सुखसंवृद्धा तस्य प्रणयिनी प्रिया ।

एकदा चिन्तयामास सुभ्रूः संकल्पशालिनी ।। १८

प्राणेभ्योऽपि प्रियो भर्ता ममैष जगतीपतिः ।

यौवनोल्लासवान्श्रीमान्कथं स्यादजरामरः ।। १९

भर्त्रानेन सहोत्तुङ्गस्तनी कुसुमसद्मसु ।

कथं स्वैरं चिरं कान्ता रमे युगशतान्यहम् ।। २०

तथा यते यत्नमतस्तपोजपयमेहितैः ।

रजनीशमुखो राजा यथा स्यादजरामरः ।। २१

ज्ञानवृद्धांस्तपोवृद्धान्विद्यावृद्धानहं द्विजान् ।

पृच्छामि तावन्मरणं कथं न स्यान्नृणामिति ।। २२

इत्यानीयाथ संपूज्य द्विजान्पप्रच्छ सा नता ।

अमरत्वं कथं विप्रा भवेदिति पुनःपुनः ।। २३

विप्रा ऊचुः ।

तपोजपयमैर्देवि समस्ताः सिद्धसिद्धयः ।

संप्राप्यन्तेऽमरत्वं तु न कदाचन लभ्यते ।। २४

इत्याकर्ण्य द्विजमुखाच्चिन्तयामास सा पुनः ।

इदं स्वप्रज्ञयैवाशु भीता प्रियवियोगतः ।। २५

मरणं भर्तुरग्रे मे यदि दैवाद्भविष्यति ।

तत्सर्वदुःखनिर्मुक्ता संस्थास्ये सुखमात्मनि ।। २६

अथ वर्षसहस्रेण भर्तादौ चेन्मरिष्यति ।

तत्करिष्ये तथा येन जीवो गेहान्न यास्यति ।। २७

तद्भ्रमद्भर्तृजीवेऽस्मिन्निजे शुद्धान्तमण्डपे ।

भर्त्रा विलोकिता नित्यं निवत्स्यामि यथासुखम् ।। २८

अद्यैवारभ्यैतदर्थं देवीं ज्ञप्तिं सरस्वतीम् ।

जपोपवासनियमैरातोषं पूजयाम्यहम् ।। २९

इति निश्चित्य सा नाथमनुक्त्वैव वराङ्गना ।

यथाशास्त्रं चचारोग्रं तथा नियममास्थिता ।। ३०

त्रिरात्रस्य त्रिरात्रस्य पर्यन्ते कृतपारणा ।

देवद्विजगुरुप्राज्ञविद्वत्पूजापरायणा ।। ३१

स्नानदानतपोध्याननित्योद्युक्तशरीरिका ।

सर्वास्तिक्यसदाचारकारिणी क्लेशहारिणी ।। ३२

यथाकालं यथोद्योगं यथाशास्त्रं यथाक्रमम् ।

तोषयामास भर्तारमपरिज्ञातसंस्थितिः ।। ३३

त्रिरात्रशतमेवं सा बाला नियमशालिनी ।

अनारतं तपोनिष्ठामतिष्ठत्कष्टचेष्टया ।। ३४

त्रिरात्राणां शते चाथ पूजिता प्रतिमानिता ।

तुष्टा भगवती गौरी वागीशा समुवाच ताम् ।। ३५

श्रीसरस्वत्युवाच ।

निरन्तरेण तपसा भर्तृभक्त्यतिशालिना ।

परितुष्टास्मि ते वत्से गृहाण वरमीप्सितम् ।। ३६

श्रीराज्ञ्युवाच ।

जय जन्मजराज्वालादाहदोषशशिप्रभे ।

जय हार्दान्धकारौघनिवारणरविप्रभे ।। ३७

अम्ब मातर्जगन्मातस्त्रायस्व कृपणामिमाम् ।

इदं वरद्वयं देहि यदहं प्रार्थये शुभे ।। ३८

एकं तावद्विदेहस्य भर्तुर्जीवो ममाम्बिके ।

अस्मादेव हि मा यासीन्निजान्तःपुरमण्डपात् ।। ३९

द्वितीयं त्वां महादेवि प्रार्थयेऽहं यदा यदा ।

दर्शनाय वरार्थाय तदा मे देहि दर्शनम् ।। ४०

इत्याकर्ण्य जगन्माता तवास्त्वेवमिति स्वयम् ।

उक्त्वान्तर्धानमगमत्प्रोत्थायोर्मिरिवार्णवे ।। ४१

अथ सा राजमहिषी परितुष्टेष्टदेवता ।

श्रुतगीतेव हरिणी बभूवानन्दधारिणी ।। ४२

पक्षमासर्तुकटके दिनारे वर्षदण्डके ।

क्षणनाभौ स्पन्दमये कालचक्रे वहत्यथ ।। ४३

अन्तर्धिमाजगामास्याः पत्युस्तच्चेतनं तनौ ।

संदृश्यमानमेवाशु शुष्कपत्ररसो यथा ।। ४४

रणखण्डितदेहेऽस्मिन्मृतेऽन्तःपुरमण्डपे ।

निर्जला नलिनीवासौ परां म्लानिमुपाययौ ।। ४५

विषोष्णश्वसनध्वस्तसकलाधरपल्लवा ।

प्राप सा मरणावस्थां सशल्येव मृगी यथा ।। ४६

प्राप सा तमसान्धत्वं तस्मिन्मरणमागते ।

दीपज्वालालवे क्षीणे सद्मश्रीरिव भूषिता ।। ४७

कार्श्यमाप क्षणेनासौ बाला विरसतां गता ।

यथा स्रोतस्विनी स्रोतक्षये क्षारविधूसरा ।। ४८

क्षिप्रमाक्रन्दिनी क्षिप्रं मौनमूका वियोगिनी ।

बभूव चक्रवाकीव मानिनी मरणोन्मुखी ।। ४९

अथ तामतिमात्रविह्वलां सकृपाकाशभवा सरस्वती ।

शफरीं ह्रदशोषविह्वलां प्रथमा वृष्टिरिवान्वकम्पत ।। ५०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे मण्डपोपाख्याने राज्ञीपरिदेवनं नाम षोडशः सर्गः ।। १६ ।।